# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**–आचार्य-1(SEM-2) | **प्रश्नपत्रम्** – ४ (New & Old) | **गुणाः** – ७० |
| **विषयः** – साहित्यम् (काव्यवर्गः) | **कोड- CC- 426[3]** | **समयः** – ११ तः २ |
| **दिनाङ्कः** – १३/०४/२०१९ | **सन्दर्भग्रन्थः**– वासवदत्ता | |

---

॥ **प्रथमान्वितिः** ॥ (Unit-1)

**प्रश्नः १ निम्नाङ्कितयोः कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०५

१. विफलमेव दुष्यन्तस्य कृते दुर्वाससः शापमनुबभूव शकुन्तला।
निरर्थकमेव मदनमञ्जरी नरवाहनदत्तं चकमे।

२. तच्छ्रुत्वा कन्दर्पकेतुरमृतार्णवनिमग्नमिव, सर्वानन्दानामुपरि वर्तमानामिवात्मानं मन्यमानो मन्दं मन्दमुत्थाय प्रसारितबाहुयुगलस्तमालिकामालिलिङ्ग ।

**प्रश्नः २ वासवदत्तायाः कथायाः सारांशं लिखत ।** १०

अथवा

**चिन्तामणिनृपस्य वर्णनं कुरुत ।**

॥ **द्वितीयान्वितिः** ॥ (Unit-2)

**प्रश्नः ३ अधोलिखितयोः गद्यांशयोः एकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०५

१. विश्वस्य विश्वस्य व्यवस्थां समासाद्यनेककालं संगीतसङ्गी तनुषे तनुषे कमनङ्गस्य पुष्पेषु पुष्पेषु रुजा तरसा जातरसा मन्दाक्षमन्दा क्षणं भ्रमन्ती मुह्यति ।

२. अनन्तरं दुग्धार्णवनिमग्नमिव, स्फाटिकगृहप्रविष्टमिव, श्वेतद्वीपनिविष्टामिव जगदामुमुदे ।

**प्रश्नः ४ वासवदत्तायाः पात्रालेखनं कुरुत ।** १०

अथवा

**चन्द्रोदयवर्णनं कथाशैल्यनुसारेण कुरुत ।**

॥ **तृतीयान्वितिः** ॥ (Unit-3)

**प्रश्नः ५ अधोलिखितयोः गद्यखण्डयोः मध्ये एकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०५

१. वसतीव सतीव्रते तव हृदि कोऽपि। शतधा शतधारसारा वाचस्तवानुभूताः।

२. अकरोच्च मनसि – अहो भुवनातिशायि सौन्दर्यम्। अहो शृङ्गारकलाकौशलम्।

**प्रश्नः ६ वासवदत्तायाः कथाशैल्याः समीक्षणं कुरुत ।** १०

अथवा

**ग्रन्थानुसारं सन्ध्यावर्णनं कुरुत ।**

॥ **चतुर्थान्वितिः** ॥ (Unit-4)

**प्रश्नः ७ अधोलिखितयोः गद्यखण्डयोः मध्ये एकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०५

१. अचिन्तयच्च – अहो मे कृतापकारेणापि विधिनोपकृतिरेव कृता, यदयं लोचनगोचरतां नीतः समुद्रः।

२. युधिष्ठिरः समरशिरसि सत्यमृत्ससर्ज। तदित्थं नास्त्येव जगत्यकलङ्कः कोऽपि। तदहमपि देहमृत्सृजामि।

**प्रश्नः ८ कन्दर्पकेतोः चरित्रचित्रणं कुरुत ।** १०

अथवा

**वासवदत्तास्वयंवरवर्णनं कुरुत ।**

**प्रश्नः ९ निम्नाङ्कितेषु दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१. वासवदत्तायाः कर्ता कोऽस्ति?

२. गद्यकाव्ये कथायाः किं लक्षणं भवति?

३. चिन्तामणिः राजा कस्य पिता आसीत्?

४. शृङ्गारशेखरस्य राज्ञः पुत्री का? (पुत्र्याः नाम किम् आसीत्?)

५. भ्रमन् कन्दर्पकेतुः कामपश्यत्?

६. वासवदत्तानामके ग्रन्थे का कथा विद्यते?

७. वासवदत्तायाः मुखमण्डलं कीदृशम्?

८. वासवदत्तायाः जनकस्य नाम किमासीत्?

९. वासवदत्तायाः जननी का आसीत्?

१०. राजा चिन्तामणिः कतीनां विद्यानां वेत्ता आसीत्?

११. वेदमूलकवाङ्मयधारायाः कति शाखाः?

१२. वासवदत्ता कीदृशं काव्यम्?

१३. कलावती का अस्ति?

१४. गद्यकाव्यस्य कति भेदाः भवन्ति?

१५. गद्यकाव्यस्य 'रत्नत्रयी' इति पदेन के समलङ्कृताः?

०००